# shrIkuNDalinIsahasranAmastotram

# શ્રીકુણ્ડલિનીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : kuNDalinIsahasra

File name : kuNDalinIsahasra.itx

Category : sahasranAma, devii, ShaTchakrashakti, stotra, devI

Location : doc_devii

Author : Traditional

Transliterated by : Mark S.G. Dyczkowski muktAbodha

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : rudrayAmale uttaratantre bhairava bhairavI sa.nvAde

Latest update : April 13, 2008

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીકુણ્ડલિનીસહસ્રનામસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
શ્રીઆનન્દભૈરવી ઉવાચ ।
અથ કાન્ત પ્રવક્ષ્યામિ કુણ્ડલીચેતનાદિકમ્ ।
સહસ્રનામસકલં કુણ્ડલિન્યાઃ પ્રિયં સુખમ્ ॥ ૧॥

અષ્ટોત્તરં મહાપુણ્યં સાક્ષાત્ સિદ્ધિપ્રદાયકમ્ ।
તવ પ્રેમવશેનૈવ કથયામિ શ ૃણુષ્વ તત્ ॥ ૨॥

વિના યજનયોગેન વિના ધ્યાનેન યત્ફલમ્ ।
તત્ફલં લભતે સદ્યો વિદ્યાયાઃ સુકૃપા ભવેત્ ॥ ૩॥

યા વિદ્યા ભુવનેશાની ત્રૈલોક્યપરિપૂજિતા ।
સા દેવી કુણ્ડલી માતા ત્રૈલોક્યં પાતિ સર્વદા ॥ ૪॥

તસ્યા નામ સહસ્રાણિ અષ્ટોત્તરશતાનિ ચ ।
શ્રવણાત્પઠનાન્મન્ત્રી મહાભક્તો ભવેદિહ ॥ ૫॥

ઐહિકે સ ભવેન્નાથ જીવન્મુક્તો મહાબલી ॥ ૬॥

અસ્ય શ્રીમન્મહાકુણ્ડલીસાષ્ટોત્તરસહસ્રનામસ્તોત્રસ્ય
બ્રહ્મર્ષીર્જગતીચ્છન્દો
ભગવતી શ્રીમન્મહાકુણ્ડલીદેવતા સર્વયોગસમૃદ્ધિસિદ્ધ્યર્થે વિનિયોગઃ ॥

કુલેશ્વરી કુલાનન્દા કુલીના કુલકુણ્ડલી ।
શ્રીમન્મહાકુણ્ડલી ચ કુલકન્યા કુલપ્રિયા ॥ ૭॥

કુલક્ષેત્રસ્થિતા કૌલી કુલીનાર્થપ્રકાશિની ।
કુલાખ્યા કુલમાર્ગસ્થા કુલશાસ્ત્રાર્થપાતિની ॥ ૮॥

કુલજ્ઞા કુલયોગ્યા ચ કુલપુષ્પપ્રકાશિની ।
કુલીના ચ કુલાધ્યક્ષા કુલચન્દનલેપિતા ॥ ૯॥

કુલરૂપા કુલોદ્ભૂતા કુલકુણ્ડલિવાસિની ।
કુલાભિન્ના કુલોત્પન્ના કુલાચારવિનોદિની ॥ ૧૦॥

કુલવૃક્ષસમુદ્ભૂતા કુલમાલા કુલપ્રભા ।
કુલજ્ઞા કુલમધ્યસ્થા કુલકઙ્કણશોભિતા ॥ ૧૧॥

કુલોત્તરા કૌલપૂજા કુલાલાપા કુલક્રિયા ।
કુલભેદા કુલપ્રાણા કુલદેવી કુલસ્તુતિઃ ॥ ૧૨॥

કૌલિકા કાલિકા કાલ્યા કલિભિન્ના કલાકલા ।
કલિકલ્મષહન્ત્રી ચ કલિદોષવિનાશિની ॥ ૧૩॥

કઙ્કાલી કેવલાનન્દા કાલજ્ઞા કાલધારિણી ।
કૌતુકી કૌમુદી કેકા કાકા કાકલયાન્તરા ॥ ૧૪॥

કોમલાઙ્ગી કરાલાસ્યા કન્દપૂજ્યા ચ કોમલા ।
કૈશોરી કાકપુચ્છસ્થા કમ્બલાસનવાસિની ॥ ૧૫॥

કૈકેયીપૂજિતા કોલા કોલપુત્રી કપિધ્વજા ।
કમલા કમલાક્ષી ચ કમ્બલાશ્વતરપ્રિયા ॥ ૧૬॥

કલિકાભઙ્ગદોષસ્થા કાલજ્ઞા કાલકુણ્ડલી ।
કાવ્યદા કવિતા વાણી કાલસન્દર્ભભેદિની ॥ ૧૭॥

કુમારી કરુણાકારા કુરુસૈન્યવિનાશિની ।
કાન્તા કુલગતા કામા કામિની કામનાશિની ॥ ૧૮॥

કામોદ્ભવા કામકન્યા કેવલા કાલઘાતિની ।
કૈલાસશિખરારૂઢા કૈલાસપતિસેવિતા ॥ ૧૯॥

કૈલાસનાથનમિતા કેયૂરહારમણ્ડિતા ।
કન્દર્પા કઠિનાનન્દા કુલગા કીચકૃત્યહા ॥ ૨૦॥

કમલાસ્યા કઠોરા ચ કીટરૂપા કટિસ્થિતા ।
કન્દેશ્વરી કન્દરૂપા કોલિકા કન્દવાસિની ॥ ૨૧॥

કૂટસ્થા કૂટભક્ષા ચ કાલકૂટવિનાશિની ।
કામાખ્યા કમલા કામ્યા કામરાજતનૂદ્ભવા ॥ ૨૨॥

કામરૂપધરા કમ્રા કમનીયા કવિપ્રિયા ।
કઞ્જાનના કઞ્જહસ્તા કઞ્જપત્રાયતેક્ષણા ॥ ૨૩॥

કાકિની કામરૂપસ્થા કામરૂપપ્રકાશિની ।
કોલાવિધ્વંસિની કઙ્કા કલઙ્કાર્કકલઙ્કિની ॥ ૨૪॥

મહાકુલનદી કર્ણા કર્ણકાણ્ડવિમોહિની ।
કાણ્ડસ્થા કાણ્ડકરુણા કર્મકસ્થા કુટુમ્બિની ॥ ૨૫॥

કમલાભા ભવા કલ્લા કરુણા કરુણામયી ।
કરુણેશી કરાકર્ત્રી કર્તૃહસ્તા કલોદયા ॥ ૨૬॥

કારુણ્યસાગરોદ્ભૂતા કારુણ્યસિન્ધુવાસિની ।
કાત્તીકેશી કાત્તીકસ્થા કાત્તીકપ્રાણપાલની ॥ ૨૭॥

કરુણાનિધિપૂજ્યા ચ કરણીયા ક્રિયા કલા ।
કલ્પસ્થા કલ્પનિલયા કલ્પાતીતા ચ કલ્પિતા ॥ ૨૮॥

કુલયા કુલવિજ્ઞાના કર્ષીણી કાલરાત્રિકા ।
કૈવલ્યદા કોકરસ્થા કલમઞ્જીરરઞ્જની ॥ ૨૯॥

કલયન્તી કાલજિહ્વા કિઙ્કરાસનકારિણી ।
કુમુદા કુશલાનન્દા કૌશલ્યાકાશવાસિની ॥ ૩૦॥

કસાપહાસહન્ત્રી ચ કૈવલ્યગુણસમ્ભવા ।
એકાકિની અર્કરૂપા કુવલા કર્કટસ્થિતા ॥ ૩૧॥

કર્કોટકા કોષ્ઠરૂપા કૂટવહ્નિકરસ્થિતા ।
કૂજન્તી મધુરધ્વાનં કામયન્તી સુલક્ષણામ્ ॥ ૩૨॥

કેતકી કુસુમાનન્દા કેતકીપુણ્યમણ્ડિતા ।
કર્પૂરપૂરરુચિરા કર્પૂરભક્ષણપ્રિયા ॥ ૩૩॥

કપાલપાત્રહસ્તા ચ કપાલચન્દ્રધારિણી ।
કામધેનુસ્વરૂપા ચ કામધેનુઃ ક્રિયાન્વિતા ॥ ૩૪॥

કશ્યપી કાશ્યપા કુન્તી કેશાન્તા કેશમોહિની ।
કાલકર્ત્રી કૂપકર્ત્રી કુલપા કામચારિણી ॥ ૩૫॥

કુઙ્કુમાભા કજ્જલસ્થા કમિતા કોપઘાતિની ।
કેલિસ્થા કેલિકલિતા કોપના કર્પટસ્થિતા ॥ ૩૬॥

કલાતીતા કાલવિદ્યા કાલાત્મપુરુષોદ્ભવા ।

કષ્ટસ્થા કષ્ટકુષ્ઠસ્થા કુષ્ઠહા કષ્ટહા કુશા ॥ ૩૭॥

કાલિકા સ્ફુટકર્ત્રી ચ કામ્બોજા કામલા કુલા ।
કુશલાખ્યા કાકકુષ્ઠા કર્મસ્થા કૂર્મમધ્યગા ॥ ૩૮॥

કુણ્ડલાકારચક્રસ્થા કુણ્ડગોલોદ્ભવા કફા ।
કપિત્થાગ્રવસાકાશા કપિત્થરોધકારિણી ॥ ૩૯॥

કાહોડ કાહડ કાડ કઙ્કુલા ભાષકારિણી ।
કનકા કનકાભા ચ કનકાદ્રિનિવાસિની ॥ ૪૦॥

કાર્પાસયજ્ઞસૂત્રસ્થા કૂટબ્રહ્માર્થસાધિની ।
કલઞ્જભક્ષિણી ક્રૂરા ક્રોધપુઞ્જા કપિસ્થિતા ॥ ૪૧॥

કપાલી સાધનરતા કનિષ્ઠાકાશવાસિની ।
કુઞ્જરેશી કુઞ્જરસ્થા કુઞ્જરા કુઞ્જરાગતિઃ ॥ ૪૨॥

કુઞ્જસ્થા કુઞ્જરમણી કુઞ્જમન્દિરવાસિની ।
કુપિતા કોપશૂન્યા ચ કોપાકોપવિવર્જીતા ॥ ૪૩॥

કપિઞ્જલસ્થા કાપિઞ્જા કપિઞ્જલતરૂદ્ભવા ।
કુન્તીપ્રેમકથાવિષ્ટા કુન્તીમાનસપૂજિતા ॥ ૪૪॥

કુન્તલા કુન્તહસ્તા ચ કુલકુન્તલલોહિની ।
કાન્તાઙ્ઘ્રસેવિકા કાન્તકુશલા કોશલાવતી ॥ ૪૫॥

કેશિહન્ત્રી કકુત્સ્થા ચ કકુત્સ્થવનવાસિની ।
કૈલાસશિખરાનન્દા કૈલાસગિરિપૂજિતા ॥ ૪૬॥

કીલાલનિર્મલાકારા કીલાલમુગ્ધકારિણી ।
કુતુના કુટ્ટહી કુટ્ટા કૂટના મોદકારિણી ॥ ૪૭॥

ક્રૌઙ્કારી ક્રૌઙ્કુરી કાશી કુહુશબ્દસ્થા કિરાતિની ।
કૂજન્તી સર્વવચનં કારયન્તી કૃતાકૃતમ્ ॥ ૪૮॥

કૃપાનિધિસ્વરૂપા ચ કૃપાસાગરવાસિની ।
કેવલાનન્દનિરતા કેવલાનન્દકારિણી ॥ ૪૯॥

કૃમિલા કૃમિદોષઘ્ની કૃપા કપટકુટ્ટિતા ।
કૃશાઙ્ગી ક્રમભઙ્ગસ્થા કિઙ્કરસ્થા કટસ્થિતા ॥ ૫૦॥

કામરૂપા કાન્તરતા કામરૂપસ્ય સિદ્ધિદા ।
કામરૂપપીઠદેવી કામરૂપાઙ્ગુજા કુજા ॥ ૫૧॥

કામરૂપા કામવિદ્યા કામરૂપાદિકાલિકા ।
કામરૂપકલા કામ્યા કામરૂપકુલેશ્વરી ॥ ૫૨॥

કામરૂપજનાનન્દા કામરૂપકુશાગ્રધીઃ ।
કામરૂપકરાકાશા કામરૂપતરુસ્થિતા ॥ ૫૩॥

કામાત્મજા કામકલા કામરૂપવિહારિણી ।
કામશાસ્ત્રાર્થમધ્યસ્થા કામરૂપક્રિયાકલા ॥ ૫૪॥

કામરૂપમહાકાલી કામરૂપયશોમયી ।
કામરૂપપરમાનન્દા કામરૂપાદિકામિની ॥ ૫૫॥

કૂલમૂલા કામરૂપપદ્મમધ્યનિવાસિની ।
કૃતાઞ્જલિપ્રિયા કૃત્યા કૃત્યાદેવીસ્થિતા કટા ॥ ૫૬॥

કટકા કાટકા કોટિકટિઘણ્ટવિનોદિની ।
કટિસ્થૂલતરા કાષ્ઠા કાત્યાયનસુસિદ્ધિદા ॥ ૫૭॥

કાત્યાયની કાચલસ્થા કામચન્દ્રાનના કથા ।
કાશ્મીરદેશનિરતા કાશ્મીરી કૃષિકર્મજા ॥ ૫૮॥

કૃષિકર્મસ્થિતા કૌર્મા કૂર્મપૃષ્ઠનિવાસિની ।
કાલઘણ્ટા નાદરતા કલમઞ્જીરમોહિની ॥ ૫૯॥

કલયન્તી શત્રુવર્ગાન્ ક્રોધયન્તી ગુણાગુણમ્ ।
કામયન્તી સર્વકામં કાશયન્તી જગત્રયમ્ ॥ ૬૦॥

કૌલકન્યા કાલકન્યા કૌલકાલકુલેશ્વરી ।
કૌલમન્દિરસંસ્થા ચ કુલધર્મવિડમ્બિની ॥ ૬૧॥

કુલધર્મરતાકારા કુલધર્મવિનાશિની ।
કુલધર્મપણ્ડિતા ચ કુલધર્મસમૃદ્ધિદા ॥ ૬૨॥

કૌલભોગમોક્ષદા ચ કૌલભોગેન્દ્રયોગિની ।
કૌલકર્મા નવકુલા શ્વેતચમ્પકમાલિની ॥ ૬૩॥

કુલપુષ્પમાલ્યાકાન્તા કુલપુષ્પભવોદ્ભવા ।
કૌલકોલાહલકરા કૌલકર્મપ્રિયા પરા ॥ ૬૪॥

કાશીસ્થિતા કાશકન્યા કાશી ચક્ષુઃપ્રિયા કુથા ।
કાષ્ઠાસનપ્રિયા કાકા કાકપક્ષકપાલિકા ॥ ૬૫॥

કપાલરસભોજ્યા ચ કપાલનવમાલિની ।
કપાલસ્થા ચ કાપાલી કપાલસિદ્ધિદાયિની ॥ ૬૬॥

કપાલા કુલકર્ત્રી ચ કપાલશિખરસ્થિતા ।
કથના કૃપણશ્રીદા કૃપી કૃપણસેવિતા ॥ ૬૭॥

કર્મહન્ત્રી કર્મગતા કર્માકર્મવિવર્જીતા ।
કર્મસિદ્ધિરતા કામી કર્મજ્ઞાનનિવાસિની ॥ ૬૮॥

કર્મધર્મસુશીલા ચ કર્મધર્મવશઙ્કરી ।
કનકાબ્જસુનિર્માણમહાસિંહાસનસ્થિતા ॥ ૬૯॥

કનકગ્રન્થિમાલ્યાઢ્યા કનકગ્રન્થિભેદિની ।
કનકોદ્ભવકન્યા ચ કનકામ્ભોજવાસિની ॥ ૭૦॥

કાલકૂટાદિકૂટસ્થા કિટિશબ્દાન્તરસ્થિતા ।
કઙ્કપક્ષિનાદમુખા કામધેનૂદ્ભવા કલા ॥ ૭૧॥

કઙ્કણાભા ધરા કર્દ્વા કર્દ્દમા કર્દ્દમસ્થિતા ।
કર્દ્દમસ્થજલાચ્છન્ના કર્દ્દમસ્થજનપ્રિયા ॥ ૭૨॥

કમઠસ્થા કાર્મુકસ્થા કમ્રસ્થા કંસનાશિની ।
કંસપ્રિયા કંસહન્ત્રી કંસાજ્ઞાનકરાલિની ॥ ૭૩॥

કાઞ્ચનાભા કાઞ્ચનદા કામદા ક્રમદા કદા ।
કાન્તભિન્ના કાન્તચિન્તા કમલાસનવાસિની ॥ ૭૪॥

કમલાસનસિદ્ધિસ્થા કમલાસનદેવતા ।
કુત્સિતા કુત્સિતરતા કુત્સા શાપવિવર્જીતા ॥ ૭૫॥

કુપુત્રરક્ષિકા કુલ્લા કુપુત્રમાનસાપહા ।
કુજરક્ષકરી કૌજી કુબ્જાખ્યા કુબ્જવિગ્રહા ॥ ૭૬॥

કુનખી કૂપદીક્ષુસ્થા કુકરી કુધની કુદા ।
કુપ્રિયા કોકિલાનન્દા કોકિલા કામદાયિની ॥ ૭૭॥

કુકામિના કુબુદ્ધિસ્થા કૂર્પવાહન મોહિની ।

કુલકા કુલલોકસ્થા કુશાસનસુસિદ્ધિદા ॥ ૭૮॥

કૌશિકી દેવતા કસ્યા કન્નાદનાદસુપ્રિયા ।
કુસૌષ્ઠવા કુમિત્રસ્થા કુમિત્રશત્રુઘાતિની ॥ ૭૯॥

કુજ્ઞાનનિકરા કુસ્થા કુજિસ્થા કર્જદાયિની ।
કકર્જા કર્જ્જકરિણી કર્જવદ્ધવિમોહિની ॥ ૮૦॥

કર્જશોધનકર્ત્રી ચ કાલાસ્ત્રધારિણી સદા ।
કુગતિઃ કાલસુગતિઃ કલિબુદ્ધિવિનાશિની ॥ ૮૧॥

કલિકાલફલોત્પન્ના કલિપાવનકારિણી ।
કલિપાપહરા કાલી કલિસિદ્ધિસુસૂક્ષ્મદા ॥ ૮૨॥

કાલિદાસવાક્યગતા કાલિદાસસુસિદ્ધિદા ।
કલિશિક્ષા કાલશિક્ષા કન્દશિક્ષાપરાયણા ॥ ૮૩॥

કમનીયભાવરતા કમનીયસુભક્તિદા ।
કરકાજનરૂપા ચ કક્ષાવાદકરા કરા ॥ ૮૪॥

કચ્ચુવર્ણા કાકવર્ણા ક્રોષ્ટુરૂપા કષામલા ।
ક્રોષ્ટ્રનાદરતા કીતા કાતરા કાતરપ્રિયા ॥ ૮૫॥

કાતરસ્થા કાતરાજ્ઞા કાતરાનન્દકારિણી ।
કાશમર્દ્દતરૂદ્ભૂતા કાશમર્દ્દવિભક્ષિણી ॥ ૮૬॥

કષ્ટહાનિઃ કષ્ટદાત્રી કષ્ટલોકવિરક્તિદા ।
કાયાગતા કાયસિદ્ધિઃ કાયાનન્દપ્રકાશિની ॥ ૮૭॥

કાયગન્ધહરા કુમ્ભા કાયકુમ્ભા કઠોરિણી ।
કઠોરતરુસંસ્થા ચ કઠોરલોકનાશિની ॥ ૮૮॥

કુમાર્ગસ્થાપિતા કુપ્રા કાર્પાસતરુસમ્ભવા ।
કાર્પાસવૃક્ષસૂત્રસ્થા કુવર્ગસ્થા કરોત્તરા ॥ ૮૯॥

કર્ણાટકર્ણસમ્ભૂતા કાર્ણાટી કર્ણપૂજિતા ।
કર્ણાસ્ત્રરક્ષિકા કર્ણા કર્ણહા કર્ણકુણ્ડલા ॥ ૯૦॥

કુન્તલાદેશનમિતા કુટુમ્બા કુમ્ભકારિકા ।
કર્ણાસરાસના કૃષ્ટા કૃષ્ણહસ્તામ્બુજાજીતા ॥ ૯૧॥

કૃષ્ણાઙ્ગી કૃષ્ણદેહસ્થા કુદેશસ્થા કુમઙ્ગલા ।
ક્રૂરકર્મસ્થિતા કોરા કિરાત કુલકામિની ॥ ૯૨॥

કાલવારિપ્રિયા કામા કાવ્યવાક્યપ્રિયા ક્રુધા ।
કજ્જલતા કૌમુદી ચ કુજ્યોત્સ્ના કલનપ્રિયા ॥ ૯૩॥

કલના સર્વભૂતાનાં કપિત્થવનવાસિની ।
કટુનિમ્બસ્થિતા કાખ્યા કવર્ગાખ્યા કવર્ગીકા ॥ ૯૪॥

કિરાતચ્છેદિની કાર્યા કાર્યાકાર્યવિવર્જીતા ।
કાત્યાયનાદિકલ્પસ્થા કાત્યાયનસુખોદયા ॥ ૯૫॥

કુક્ષેત્રસ્થા કુલાવિદ્ઘા કરણાદિપ્રવેશિની ।
કાઙ્કાલી કિઙ્કુલા કાલા કિલિતા સર્વકામિની ॥ ૯૬॥

કીલિતાપેક્ષિતા કૂટા કૂટકુઙ્કુમચર્ચીતા ।
કુઙ્કુમાગન્ધનિલયા કુટુમ્બભવનસ્થિતા ॥ ૯૭॥

કુકૃપા કરણાનન્દા કવિતારસમોહિની ।
કાવ્યશાસ્ત્રાનન્દરતા કાવ્યપૂજ્યા કવીશ્વરી ॥ ૯૮॥

કટકાદિહસ્તિરથહયદુન્દુભિશબ્દિની ।
કિતવા ક્રૂરધૂર્તસ્થા કેકાશબ્દનિવાસિની ॥ ૯૯॥

કેં કેવલામ્બિતા કેતા કેતકીપુષ્પમોહિની ।
કૈં કૈવલ્યગુણોદ્ધાસ્યા કૈવલ્યધનદાયિની ॥ ૧૦૦॥

કરી ધનીન્દ્રજનની કાક્ષતાક્ષકલઙ્કિની ।
કુડુવાન્તા કાન્તિશાન્તા કાંક્ષા પારમહંસ્યગા ॥ ૧૦૧॥

કર્ત્રી ચિત્તા કાન્તવિત્તા કૃષણા કૃષિભોજિની ।
કુઙ્કુમાશક્તહૃદયા કેયૂરહારમાલિની ॥ ૧૦૨॥

કીશ્વરી કેશવા કુમ્ભા કૈશોરજનપૂજિતા ।
કલિકામધ્યનિરતા કોકિલસ્વરગામિની ॥ ૧૦૩॥

કુરદેહહરા કુમ્બા કુડુમ્બા કુરભેદિની ।
કુણ્ડલીશ્વરસંવાદા કુણ્ડલીશ્વરમધ્યગા ॥ ૧૦૪॥

કાલસૂક્ષ્મા કાલયજ્ઞા કાલહારકરી કહા ।
કહલસ્થા કલહસ્થા કલહા કલહાઙ્કુરી ॥ ૧૦૫॥

કુરઙ્ગી શ્રીકુરઙ્ગસ્થા કોરઙ્ગી કુણ્ડલાપહા ।
કુકલઙ્કી કૃષ્ણબુદ્ધિઃ કૃષ્ણા ધ્યાનનિવાસિની ॥ ૧૦૬॥

કુતવા કાષ્ઠવલતા કૃતાર્થકરણી કુસી ।
કલનકસ્થા કસ્વરસ્થા કલિકા દોષભઙ્ગજા ॥ ૧૦૭॥

કુસુમાકારકમલા કુસુમસ્રગ્વિભૂષણા ।
કિઞ્જલ્કા કૈતવાર્કશા કમનીયજલોદયા ॥ ૧૦૮॥

કકારકૂટસર્વાઙ્ગી કકારામ્બરમાલિની ।
કાલભેદકરા કાટા કર્પવાસા કકુત્સ્થલા ॥ ૧૦૯॥

કુવાસા કબરી કર્વા કૂસવી કુરુપાલની ।
કુરુપૃષ્ઠા કુરુશ્રેષ્ઠા કુરૂણાં જ્ઞાનનાશિની ॥ ૧૧૦॥

કુતૂહલરતા કાન્તા કુવ્યાપ્તા કષ્ટબન્ધના ।
કષાયણતરુસ્થા ચ કષાયણરસોદ્ભવા ॥ ૧૧૧॥

કતિવિદ્યા કુષ્ઠદાત્રી કુષ્ઠિશોકવિસર્જની ।
કાષ્ઠાસનગતા કાર્યાશ્રયા કા શ્રયકૌલિકા ॥ ૧૧૨॥

કાલિકા કાલિસન્ત્રસ્તા કૌલિકધ્યાનવાસિની ।
ક્લૃપ્તસ્થા ક્લૃપ્તજનની ક્લૃપ્તચ્છન્ના કલિધ્વજા ॥ ૧૧૩॥

કેશવા કેશવાનન્દા કેશ્યાદિદાનવાપહા ।
કેશવાઙ્ગજકન્યા ચ કેશવાઙ્ગજમોહિની ॥ ૧૧૪॥

કિશોરાર્ચનયોગ્યા ચ કિશોરદેવદેવતા ।
કાન્તશ્રીકરણી કુત્યા કપટા પ્રિયઘાતિની ॥ ૧૧૫॥

કુકામજનિતા કૌઞ્ચા કૌઞ્ચસ્થા કૌઞ્ચવાસિની ।
કૂપસ્થા કૂપબુદ્ધિસ્થા કૂપમાલા મનોરમા ॥ ૧૧૬॥

કૂપપુષ્પાશ્રયા કાન્તિઃ ક્રમદાક્રમદાક્રમા ।
કુવિક્રમા કુક્રમસ્થા કુણ્ડલીકુણ્ડદેવતા ॥ ૧૧૭॥

કૌણ્ડિલ્યનગરોદ્ભૂતા કૌણ્ડિલ્યગોત્રપૂજિતા ।
કપિરાજસ્થિતા કાપી કપિબુદ્ધિબલોદયા ॥ ૧૧૮॥

કપિધ્યાનપરા મુખ્યા કુવ્યવસ્થા કુસાક્ષિદા ।

કુમધ્યસ્થા કુકલ્પા ચ કુલપઙ્ક્તિપ્રકાશિની ॥ ૧૧૯॥

કુલભ્રમરદેહસ્થા કુલભ્રમરનાદિની ।
કુલાસઙ્ગા કુલાક્ષી ચ કુલમત્તા કુલાનિલા ॥ ૧૨૦॥

કલિચિન્હા કાલચિન્હા કણ્ઠચિન્હા કવીન્દ્રજા ।
કરીન્દ્રા કમલેશશ્રીઃ કોટિકન્દર્પદર્પહા ॥ ૧૨૧॥

કોટિતેજોમયી કોટ્યા કોટીરપદ્મમાલિની ।
કોટીરમોહિની કોટિઃ કોટિકોટિવિધૂદ્ભવા ॥ ૧૨૨॥

કોટિસૂર્યસમાનાસ્યા કોટિકાલાનલોપમા ।
કોટીરહારલલિતા કોટિપર્વતધારિણી ॥ ૧૨૩॥

કુચયુગ્મધરા દેવી કુચકામપ્રકાશિની ।
કુચાનન્દા કુચાચ્છન્ના કુચકાઠિન્યકારિણી ॥ ૧૨૪॥

કુચયુગ્મમોહનસ્થા કુચમાયાતુરા કુચા ।
કુચયૌવનસમ્મોહા કુચમર્દનસૌખ્યદા ॥ ૧૨૫॥

કાચસ્થા કાચદેહા ચ કાચપૂરનિવાસિની ।
કાચગ્રસ્થા કાચવર્ણા કીચકપ્રાણનાશિની ॥ ૧૨૬॥

કમલા લોચનપ્રેમા કોમલાક્ષી મનુપ્રિયા ।
કમલાક્ષી કમલજા કમલાસ્યા કરાલજા ॥ ૧૨૭॥

કમલાઙ્ઘિરદ્વયા કામ્યા કરાખ્યા કરમાલિની ।
કરપદ્મધરા કન્દા કન્દબુદ્ધિપ્રદાયિની ॥ ૧૨૮॥

કમલોદ્ભવપુત્રી ચ કમલા પુત્રકામિની ।
કિરન્તી કિરણાચ્છન્ના કિરણપ્રાણવાસિની ॥ ૧૨૯॥

કાવ્યપ્રદા કાવ્યચિત્તા કાવ્યસારપ્રકાશિની ।
કલામ્બા કલ્પજનની કલ્પભેદાસનસ્થિતા ॥ ૧૩૦॥

કાલેચ્છા કાલસારસ્થા કાલમારણઘાતિની ।
કિરણક્રમદીપસ્થા કર્મસ્થા ક્રમદીપિકા ॥ ૧૩૧॥

કાલલક્ષ્મીઃ કાલચણ્ડા કુલચણ્ડેશ્વરપ્રિયા ।
કાકિનીશક્તિદેહસ્થા કિતવા કિન્તકારિણી ॥ ૧૩૨॥

કરઞ્ચા કઞ્ચુકા ક્રૌઞ્ચા કાકચઞ્ચુપુટસ્થિતા ।
કાકાખ્યા કાકશબ્દસ્થા કાલાગ્નિદહનાર્થીકા ॥ ૧૩૩॥

કુચક્ષનિલયા કુત્રા કુપુત્રા ક્રતુરક્ષિકા ।
કનકપ્રતિભાકારા કરબન્ધાકૃતિસ્થિતા ॥ ૧૩૪॥

કૃતિરૂપા કૃતિપ્રાણા કૃતિક્રોધનિવારિણી ।
કુક્ષિરક્ષાકરા કુક્ષા કુક્ષિબ્રહ્માણ્ડધારિણી ॥ ૧૩૫॥

કુક્ષિદેવસ્થિતા કુક્ષિઃ ક્રિયાદક્ષા ક્રિયાતુરા ।
ક્રિયાનિષ્ઠા ક્રિયાનન્દા ક્રતુકર્મા ક્રિયાપ્રિયા ॥ ૧૩૬॥

કુશલાસવસંશક્તા કુશારિપ્રાણવલ્લભા ।
કુશારિવૃક્ષમદિરા કાશીરાજવશોદ્યમા ॥ ૧૩૭॥

કાશીરાજગૃહસ્થા ચ કર્ણભ્રાતૃગૃહસ્થિતા ।
કર્ણાભરણભૂષાઢ્યા કણ્ઠભૂષા ચ કણ્ઠિકા ॥ ૧૩૮॥

કણ્ઠસ્થાનગતા કણ્ઠા કણ્ઠપદ્મનિવાસિની ।
કણ્ઠપ્રકાશકારિણી કણ્ઠમાણિક્યમાલિની ॥ ૧૩૯॥

કણ્ઠપદ્મસિદ્ધિકરી કણ્ઠાકાશનિવાસિની ।
કણ્ઠપદ્મસાકિનીસ્થા કણ્ઠષોડશપત્રિકા ॥ ૧૪૦॥

કૃષ્ણાજિનધરા વિદ્યા કૃષ્ણાજિનસુવાસસી ।
કુતકસ્થા કુખેલસ્થા કુણ્ડવાલઙ્કૃતાકૃતા ॥ ૧૪૧॥

કલગીતા કાલઘજા કલભઙ્ગપરાયણા ।
કાલીચન્દ્રા કલા કાવ્યા કુચસ્થા કુચલપ્રદા ॥ ૧૪૨॥

કુચૌરઘાતિની કચ્છા કચ્છાદસ્થા કજાતના ।
કઞ્જાછદમુખી કઞ્જા કઞ્જતુણ્ડા કજીવલી ॥ ૧૪૩॥

કામરાભાર્સુરવાદ્યસ્થા કિયધઙ્કારનાદિની ।
કણાદયજ્ઞસૂત્રસ્થા કીલાલયજ્ઞસઞ્જ્ઞકા ॥ ૧૪૪॥

કટુહાસા કપાટસ્થા કટધૂમનિવાસિની ।
કટિનાદઘોરતરા કુટ્ટલા પાટલિપ્રિયા ॥ ૧૪૫॥

કામચારાબ્જનેત્રા ચ કામચોદ્ધારસઙ્ક્રમા ।
કાષ્ઠપર્વતસન્દાહા કુષ્ઠાકુષ્ઠ નિવારિણી ॥ ૧૪૬॥

કહોડમન્ત્રસિદ્ધસ્થા કાહલા ડિણ્ડિમપ્રિયા ।
કુલડિણ્ડિમવાદ્યસ્થા કામડામરસિદ્ધિદા ॥ ૧૪૭॥

કુલામરવધ્યસ્થા કુલકેકાનિનાદિની ।
કોજાગરઢોલનાદા કાસ્યવીરરણસ્થિતા ॥ ૧૪૮॥

કાલાદિકરણચ્છિદ્રા કરુણાનિધિવત્સલા ।
ક્રતુશ્રીદા કૃતાર્થશ્રીઃ કાલતારા કુલોત્તરા ॥ ૧૪૯॥

કથાપૂજ્યા કથાનન્દા કથના કથનપ્રિયા ।
કાર્થચિન્તા કાર્થવિદ્યા કામમિથ્યાપવાદિની ॥ ૧૫૦॥

કદમ્બપુષ્પસઙ્કાશા કદમ્બપુષ્પમાલિની ।
કાદમ્બરી પાનતુષ્ટા કાયદમ્ભા કદોદ્યમા ॥ ૧૫૧॥

કુઙ્કુલેપત્રમધ્યસ્થા કુલાધારા ધરપ્રિયા ।
કુલદેવશરીરાર્ધા કુલધામા કલાધરા ॥ ૧૫૨॥

કામરાગા ભૂષણાઢ્યા કામિનીરગુણપ્રિયા ।
કુલીના નાગહસ્તા ચ કુલીનનાગવાહિની ॥ ૧૫૩॥

કામપૂરસ્થિતા કોપા કપાલી બકુલોદ્ભવા ।
કારાગારજનાપાલ્યા કારાગારપ્રપાલિની ॥ ૧૫૪॥

ક્રિયાશક્તિઃ કાલપઙ્ક્તિઃ કાર્ણપઙ્ક્તિઃ કફોદયા ।
કામફુલ્લારવિન્દસ્થા કામરૂપફલાફલા ॥ ૧૫૫॥

કાયફલા કાયફેણા કાન્તા નાડીફલીશ્વરા ।
કમફેરુગતા ગૌરી કાયવાણી કુવીરગા ॥ ૧૫૬॥

કબરીમણિબન્ધસ્થા કાવેરીતીર્થસઙ્ગમા ।
કામભીતિહરા કાન્તા કામવાકુભ્રમાતુરા ॥ ૧૫૭॥

કવિભાવહરા ભામા કમનીયભયાપહા ।
કામગર્ભદેવમાતા કામકલ્પલતામરા ॥ ૧૫૮॥

કમઠપ્રિયમાંસાદા કમઠા મર્કટપ્રિયા ।
કિમાકારા કિમાધારા કુમ્ભકારમનસ્થિતા ॥ ૧૫૯॥

કામ્યયજ્ઞસ્થિતા ચણ્ડા કામ્યયજ્ઞોપવીતિકા ।

કામયાગસિદ્ધિકરી કામમૈથુનયામિની ॥ ૧૬૦॥

કામાખ્યા યમલાશસ્થા કાલયામા કુયોગિની ।
કુરુયાગહતાયોગ્યા કુરુમાંસવિભક્ષિણી ॥ ૧૬૧॥

કુરુરક્તપ્રિયાકારી કિઙ્કરપ્રિયકારિણી ।
કર્ત્રીશ્વરી કારણાત્મા કવિભક્ષા કવિપ્રિયા ॥ ૧૬૨॥

કવિશત્રુપ્રષ્ઠલગ્ના કૈલાસોપવનસ્થિતા ।
કલિત્રિધા ત્રિસિદ્ધિસ્થા કલિત્રિદિનસિદ્ધિદા ॥ ૧૬૩॥

કલઙ્કરહિતા કાલી કલિકલ્મષકામદા ।
કુલપુષ્પરઙ્ગ સૂત્રમણિગ્રન્થિસુશોભના ॥ ૧૬૪॥

કમ્બોજવઙ્ગદેશસ્થા કુલવાસુકિરક્ષિકા ।
કુલશાસ્ત્રક્રિયા શાન્તિઃ કુલશાન્તિઃ કુલેશ્વરી ॥ ૧૬૫॥

કુશલપ્રતિભા કાશી કુલષટ્ચક્રભેદિની ।
કુલષટ્પદ્મમધ્યસ્થા કુલષટ્પદ્મદીપિની ॥ ૧૬૬॥

કૃષ્ણમાર્જારકોલસ્થા કૃષ્ણમાર્જારષષ્ઠિકા ।
કુલમાર્જારકુપિતા કુલમાર્જારષોડશી ॥ ૧૬૭॥

કાલાન્તકવલોત્પન્ના કપિલાન્તકઘાતિની ।
કલહાસા કાલહશ્રી કલહાર્થા કલામલા ॥ ૧૬૮॥

કક્ષપપક્ષરક્ષા ચ કુક્ષેત્રપક્ષસંક્ષયા ।
કાક્ષરક્ષાસાક્ષિણી ચ મહામોક્ષપ્રતિષ્ઠિતા ॥ ૧૬૯॥

અર્કકોટિશતચ્છાયા આન્વીક્ષિકિઙ્કરાચીતા ।
કાવેરીતીરભૂમિસ્થા આગ્નેયાર્કાસ્ત્રધારિણી ॥ ૧૭૦॥

ઇં કિં શ્રીં કામકમલા પાતુ કૈલાસરક્ષિણી ।
મમ શ્રીં ઇં બીજરૂપા પાતુ કાલી શિરસ્થલમ્ ॥ ૧૭૧॥

ઉરુસ્થલાબ્જં સકલં તમોલ્કા પાતુ કાલિકા ।
ઊડુમ્બન્ચર્કરમણી ઉષ્ટ્રેગ્રા કુલમાતૃકા ॥ ૧૭૨॥

કૃતાપેક્ષા કૃતિમતી કુઙ્કારી કિંલિપિસ્થિતા ।
કુન્દીર્ઘસ્વરા ક્લૃપ્તા ચ કેં કૈલાસકરાચીકા ॥ ૧૭૩॥

કૈશોરી કૈં કરી કૈં કેં બીજાખ્યા નેત્રયુગ્મકમ્ ।
કોમા મતઙ્ગયજિતા કૌશલ્યાદિ કુમારિકા ॥ ૧૭૪॥

પાતુ મે કર્ણયુગ્મન્તુ ક્રૌં ક્રૌં જીવકરાલિની ।
ગણ્ડયુગ્મં સદા પાતુ કુણ્ડલી અઙ્કુવાસિની ॥ ૧૭૫॥

અર્કકોટિશતાભાસા અક્ષરાક્ષરમાલિની ।
આશુતોષકરી હસ્તા કુલદેવી નિરઞ્જના ॥ ૧૭૬॥

પાતુ મે કુલપુષ્પાઢ્યા પૃષ્ઠદેશં સુકૃત્તમા ।
કુમારી કામનાપૂર્ણા પાર્શ્વદેશં સદાવતુ ॥ ૧૭૭॥

દેવી કામાખ્યકા દેવી પાતુ પ્રત્યઙ્ગિરા કટિમ્ ।
કટિસ્થદેવતા પાતુ લિઙ્ગમૂલં સદા મમ ॥ ૧૭૮॥

ગુહ્યદેશં કાકિની મે લિઙ્ગાધઃ કુલસિંહિકા ।
કુલનાગેશ્વરી પાતુ નિતમ્બદેશમુત્તમમ્ ॥ ૧૭૯॥

કઙ્કાલમાલિની દેવી મે પાતુ ચારુમૂલકમ્ ।
જઙ્ઘાયુગ્મં સદા પાતુ કીર્તીઃ ચક્રાપહારિણી ॥ ૧૮૦॥

પાદયુગ્મં પાકસંસ્થા પાકશાસનરક્ષિકા ।
કુલાલચક્રભ્રમરા પાતુ પાદાઙ્ગુલીર્મમ ॥ ૧૮૧॥

નખાગ્રાણિ દશવિધા તથા હસ્તદ્વયસ્ય ચ ।
વિંશરૂપા કાલનાક્ષા સર્વદા પરિરક્ષતુ ॥ ૧૮૨॥

કુલચ્છત્રાધારરૂપા કુલમણ્ડલગોપિતા ।
કુલકુણ્ડલિની માતા કુલપણ્ડિતમણ્ડિતા ॥ ૧૮૩॥

કાકાનની કાકતુણ્ડી કાકાયુઃ પ્રખરાર્કજા ।
કાકજ્વરા કાકજિહ્વા કાકાજિહ્વા સનસ્થિતા ॥ ૧૮૪॥

કપિધ્વજા કપિક્રોશા કપિબાલા હિકસ્વરા ।
કાલકાઞ્ચી વિંશતિસ્થા સદા વિંશનખાગ્રહમ્ ॥ ૧૮૫॥

પાતુ દેવી કાલરૂપા કલિકાલફલાલયા ।
વાતે વા પર્વતે વાપિ શૂન્યાગારે ચતુષ્પથે ॥ ૧૮૬॥

કુલેન્દ્રસમયાચારા કુલાચારજનપ્રિયા ।
કુલપર્વતસંસ્થા ચ કુલકૈલાસવાસિની ॥ ૧૮૭॥

મહાદાવાનલે પાતુ કુમાર્ગે કુત્સિતગ્રહે ।
રાજ્ઞોઽપ્રિયે રાજવશ્યે મહાશત્રુવિનાશને ॥ ૧૮૮॥

કલિકાલમહાલક્ષ્મીઃ ક્રિયાલક્ષ્મીઃ કુલામ્બરા ।
કલીન્દ્રકીલિતા કીલા કીલાલસ્વર્ગવાસિની ॥ ૧૮૯॥

દશદિક્ષુ સદા પાતુ ઇન્દ્રાદિદશલોકપા ।
નવચ્છિન્ને સદા પાતુ સૂર્યાદિકનવગ્રહા ॥ ૧૯૦॥

પાતુ માં કુલમાંસાઢ્યા કુલપદ્મનિવાસિની ।
કુલદ્રવ્યપ્રિયા મધ્યા ષોડશી ભુવનેશ્વરી ॥ ૧૯૧॥

વિદ્યાવાદે વિવાદે ચ મત્તકાલે મહાભયે ।
દુર્ભીક્ષાદિભયે ચૈવ વ્યાધિસઙ્કરપીડિતે ॥ ૧૯૨॥

કાલીકુલ્લા કપાલી ચ કામાખ્યા કામચારિણી ।
સદા માં કુલસંસર્ગે પાતુ કૌલે સુસઙ્ગતા ॥ ૧૯૩॥

સર્વત્ર સર્વદેશે ચ કુલરૂપા સદાવતુ ।
ઇત્યેતત્ કથિતં નાથ માતુઃ પ્રસાદહેતુના ॥ ૧૯૪॥

અષ્ટોત્તરશતં નામ સહસ્રં કુણ્ડલીપ્રિયમ્ ।
કુલકુણ્ડલિનીદેવ્યાઃ સર્વમન્ત્રસુસિદ્ધયે ॥ ૧૯૫॥

સર્વદેવમનૂનાઞ્ચ ચૈતન્યાય સુસિદ્ધયે ।
અણિમાદ્યષ્ટસિદ્ધ્યર્થં સાધકાનાં હિતાય ચ ॥ ૧૯૬॥

બ્રાહ્મણાય પ્રદાતવ્યં કુલદ્રવ્યપરાય ચ ।
અકુલીનેઽબ્રાહ્મણે ચ ન દેયઃ કુણ્ડલીસ્તવઃ ।
પ્રવૃત્તે કુણ્ડલીચક્રે સર્વે વર્ણા દ્વિજાતયઃ ॥ ૧૯૭॥

નિવૃત્તે ભૈરવીચક્રે સર્વે વર્ણાઃ પૃથક્પૃથક્ ।
કુલીનાય પ્રદાતવ્યં સાધકાય વિશેષતઃ ॥ ૧૯૮॥

દાનાદેવ હિ સિદ્ધિઃ સ્યાન્મમાજ્ઞાબલહેતુના ।
મમ ક્રિયાયાં યસ્તિષ્ઠેત્સ મે પુત્રો ન સંશયઃ ॥ ૧૯૯॥

સ આયાતિ મમ પદં જીવન્મુક્તઃ સ વાસવઃ ।
આસવેન સમાંસેન કુલવહ્નૌ મહાનિશિ ॥ ૨૦૦॥

નામ પ્રત્યેકમુચ્ચાર્ય જુહુયાત્ કાર્યસિદ્ધયે ।
પઞ્ચાચારરતો ભૂત્ત્વા ઊર્ધ્વરેતા ભવેદ્યતિઃ ॥ ૨૦૧॥

સંવત્સરાન્મમ સ્થાને આયાતિ નાત્ર સંશયઃ ।
ઐહિકે કાર્યસિદ્ધિઃ સ્યાત્ દૈહિકે સર્વસિદ્ધિદઃ ॥ ૨૦૨॥

વશી ભૂત્ત્વા ત્રિમાર્ગસ્થાઃ સ્વર્ગભૂતલવાસિનઃ ।
અસ્ય ભૃત્યાઃ પ્રભવન્તિ ઇન્દ્રાદિલોકપાલકાઃ ॥ ૨૦૩॥

સ એવ યોગી પરમો યસ્યાર્થેઽયં સુનિશ્ચલઃ ।
સ એવ ખેચરો ભક્તો નારદાદિશુકોપમઃ ॥ ૨૦૪॥

યો લોકઃ પ્રજપત્યેવં સ શિવો ન ચ માનુષઃ ।
સ સમાધિગતો નિત્યો ધ્યાનસ્થો યોગિવલ્લભઃ ॥ ૨૦૫॥

ચતુર્વ્યૂહગતો દેવઃ સહસા નાત્ર સંશયઃ ।
યઃ પ્રધારયતે ભક્ત્યા કણ્ઠે વા મસ્તકે ભુજે ॥ ૨૦૬॥

સ ભવેત્ કાલિકાપુત્રો વિદ્યાનાથઃ સ્વયંભુવિ ।
ધનેશઃ પુત્રવાન્ યોગી યતીશઃ સર્વગો ભવેત્ ॥ ૨૦૭॥

વામા વામકરે ધૃત્ત્વા સર્વસિદ્ધીશ્વરો ભવેત્ ।
યદિ પઠતિ મનુષ્યો માનુષી વા મહત્યા ॥ ૨૦૮॥

સકલધનજનેશી પુત્રિણી જીવવત્સા ।
કુલપતિરિહ લોકે સ્વર્ગમોક્ષૈકહેતુઃ
સ ભવતિ ભવનાથો યોગિનીવલ્લભેશઃ ॥ ૨૦૯॥

પઠતિ ય ઇહ નિત્યં ભક્તિભાવેન મર્ત્યો
હરણમપિ કરોતિ પ્રાણવિપ્રાણયોગઃ ।
સ્તવનપઠનપુણ્યં કોટિજન્માઘનાશ
કથિતુમપિ ન શક્તોઽહં મહામાંસભક્ષા ॥ ૨૧૦॥

॥ ઇતિ શ્રીરુદ્રયામલે ઉત્તરતન્ત્રે ષટ્ચક્રપ્રકાશે ભૈરવીભૈરવસંવાદે
મહાકુલકુણ્ડલિની સહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Mark S.G. Dyczkowski muktAbodha
Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*shrIkuNDalinIsahasranAmastotram*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*